# Akhyashashtih

# આખ્યાષષ્ટિઃ

## Document Information

Text title : Akhyashashtih

File name : AkhyAShaShTiH.itx

Category : shiva, shrIdhara-venkaTesha, ShaShTi

Location : doc_shiva

Author : Sri Sridhara Venkatesa

Proofread by : Aruna Narayanan

Description-comments : shrIdharastutimaNimAlA dvitIyo bhAgaH stutimaNimAlA

Latest update : November 20, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2021

*sanskritdocuments.org*

# આખ્યાષષ્ટિઃ

શિવં પરમકલ્યાણં અવ્યાજકરુણાનિધિમ્ ।
તદાખ્યાં સૌખ્યજનનીં વન્દે વક્ત્રાર્તિહારિણીમ્ ॥ ૧॥

શિવાખ્યે નો જાને શિવમિતરદેવાનપિ જન-
ન્યયે ક્વામી ક્વાસાવહમહહ દિષ્ટ્યા તુ ભવતીમ્ ।
સમીક્ષે મત્સર્વશ્રમમુષમિહામૂકસુલભાં
સ્વલબ્ધૃસ્વાધીનાખિલભુવનસામ્રાજ્યવિભવામ્ ॥ ૨॥

સ્વકીયૈઃ સ્રોતોભિર્જગદખિલમાક્રામતિ કલૌ
નિમગ્નાસ્તે વર્ણાશ્રમનિયમધર્માઃ સ્ફુટમિદમ્ ।
પ્રલીના ધ્યાનાદિર્ભજનસૃતિરેકા પુનરયે
પરિત્રાતું વિશ્વં પુરભિદભિધે ત્વં વિજયસે ॥ ૩॥

શિવાખ્યે વાચ્યોઽર્થસ્તવ હિ પુરભિદ્વાઽસ્તુ મુરભિત્
સ લોકાનામીષ્ટાં-અવતુ ચ સુખેન શ્રિતજનમ્ ।
અલં નાહં તસ્યાનુસૃતિષુ સ મા ભૂદપિ ચ મે
શ્રિતોઽહં ત્વાં યત્ત્વદ્ભવતિ મમ કલ્યાણિ તદલમ્ ॥ ૪॥

સ્વયમ્ભૂદૈત્યારિત્રિપુરમથનાનીરિતકૃતઃ
ત્રિલોકીસામ્રાજ્યં તદપિ નયનાદેશવશગમ્ ।
વિધાતું ત્વદ્ભાજસ્ત્વમલમલઘુસ્તે હિ મહિમા
મહેશાખ્યે વાચામતિસરણિમાચામતિતરામ્ ॥ ૫॥

કરાળાદ્યત્ ક્ષ્વેળાજ્જગદવિતવાનિન્દુમકુટઃ
કૃતાન્તાદ્દુર્દાન્તાદ્યદપિ મુનિચૂડામણિસુતમ્ ।
અનલ્પૈઃ કિં જલ્પૈઃ તદિદમિદમવનીયસ્ય રસના-
કૃતત્વત્સેવાયાશ્ચરિતમભિધે મન્મથરિપોઃ ॥ ૬॥

શતં સન્ત્વામ્નાયાશ્શતમપિ પુરાણાગમગણાઃ

વિહાય ત્વામેતે વિતરિતુમલં કિં શિવધિયમ્ ।
અશેષગ્લાનિં યા હરતિ ભવતી તુ શ્રમમૃતે
શિવાખ્યે માતસ્તામિતરનિરપેક્ષા વિતરતિ ॥ ૭॥

ત્રિનેત્રસ્ય ગ્લાનિસ્ત્રિપુરદનુજાદીન્ મુરરિપોઃ
દશગ્રીવપ્રષ્ઠાનપિ દલયિતું હન્ત કિયતી ।
નિયન્ત્રી યા તેષાં નિખિલજગતોઽપ્યાશુ દળય-
સ્યવિદ્યાં નિર્યત્નં નિટિલનયનાખ્યે જનનિ તામ્ ॥ ૮॥

ભવત્યાઃ પન્થાનશ્શતમખમુખશ્રીભિરભિતઃ
સુધાસારૈસ્સિક્તાઃ કુસુમસમવાયૈશ્ચ નિચિતાઃ ।
ક્રિયન્તે નિર્યાહિ સ્મરભિદભિધે દીયત ઇતઃ
કરાલમ્બો જાગ્રદ્વિનયભરયા મુક્તિરમયા ॥ ૯॥

શિવાખ્યે જિહ્વાયાં વહતિ ભવતીં યસ્તમખિલં
શરદ્રાકાચન્દ્રદ્યુતિમસિતકણ્ઠં ત્રિનયનમ્ ।
વિધૂન્મીલન્મૌળિં વિરચયસિ કેયં વ્યસનિતા
વિહન્તું તે જીવેષ્વહહ શિવભાવાસુલભતામ્ ॥ ૧૦॥

સમાચક્ષાણસ્ય સ્મરભિદભિધે દેવિ ભવતીં
અહો યસ્યાં યસ્યાં હરિતિ નયનાન્તોઽવતરતિ ।
હરાસ્તસ્યાં તસ્યામળિકનયનાશ્ચન્દ્રમકુટાઃ
શરજ્યોત્સ્નાગૌરાસ્સહ ગિરિજયોદ્યન્તિ શતશઃ ॥ ૧૧॥

શિવઃ કામં ક્રોધાકુલમતિરજૈષીત્ ત્વદનુગૈઃ
જિતઃ કામઃ ક્રોધોઽપ્યથ મુનિકુમારં યમભયાત્ ।
શિવોઽરક્ષીદેકં સયતનમિમે તદ્ભયહૃતો-
ઽખિલસ્યેક્ષામાત્રાજ્જિતમિહ શિવાખ્યે ત્વદનુગૈઃ ॥ ૨॥

ચરન્તીં ત્વચ્છાયાં શશિવદુપવારાશિ વસતી-
ત્યદોમુખ્યાસૂક્તિષ્વપિ રસનયા સઙ્કુલયતઃ ।
પરાગં બ્રહ્માદ્યાઃ પદકલિતમઞ્ચન્તિ શિરસા
શિવાખ્યે ત્વન્નિષ્ઠૈર્જિતમિતિ કિમમ્બાદ્ભુતમિદમ્ ॥ ૧૩॥

ભવત્યાં સ્પૃષ્ટાયાં બત પુરહરાખ્યે રસનયા
કરાળેન ગ્રીવા ભવતિ ગરળેનાસ્ય કલિતા ।
હુતાશેનાશ્લિષ્ટો ભવતિ ચ કરોઽઙ્ગાનિ ભુજગૈઃ

ભવન્તિ ક્રાન્તાનિ શ્રિતકુશલદા ત્વં તુ વિદિતા ॥ ૧૪॥

દશાયામન્ત્યાયાં દળિતબલદીનેન્દ્રિયતતૌ
મહેશાખ્યે જિહ્વાં શ્રવણમપિ વા સંશ્રિતવતી ।
ભવત્યેકૈવાસ્ય પ્રતિભવતિ ભદ્રાય મહતે
તદા કેનાન્યેનોન્મિષતુ કણિકા વાપ્યુપકૃતેઃ ॥ ૧૫॥

મનાગપ્યસ્પૃષ્ટા ગહનદહનેનેહ વિષયા-
ભિધાનેનાનેન ક્ષિતિધરસુતાનેતુરભિધે ।
રમન્તે કામં તે કતિચિદધિકલ્લોલિતસુધા-
ઝરાયાં ધારાયાં શિશિરશિશિરાયાં સુકૃતિનઃ ॥ ૧૬॥

વધૂટીપુત્રાદીન્ વસુવિસરમાનમ્રનૃપતિ-
ચ્છટાચૂડારત્નચ્છવિકવચિતાશાં શ્રિયમપિ ।
જહત્યેકે ધન્યા જગતિ મદનદ્રોગ્ધુરભિધે
વિહારે સોત્કણ્ઠા વિહતિરહિતે ત્વલ્લહરિષુ ॥ ૧૭॥

અજસ્રં તન્વાનાઃ શ્વસિતુમપિ મામક્ષમમિમં
કદા વા ક્રામન્તુ પ્રતિહતકરાળોપહતયઃ ।
પુરારાતેરાખ્યે પુરભિદનુભૂત્યૂર્મિળસુખ-
પ્રતીપેભધ્વંસપ્રબલહરયસ્ત્વલ્લહરયઃ ॥ ૧૮॥

શિવાખ્યે ત્વત્સ્રોતસ્તતિષુ વિહૃતિં બાધિષત મા
મમાશક્ત્યાલસ્યારતિગદનિહત્ત્યાદ્યભિભવાઃ ।
પ્રકામં બાધન્તામિતરમખિલં તેઽભિત ઇમે
પ્રણામાસ્તે સન્તુ પ્રવિરચય મત્કાઙ્ક્ષિતમિદમ્ ॥ ૧૯॥

કિમન્યન્મન્યન્તે જગતિ ન તૃણાયાપિ કતિચિત્
પદં માતશ્શાતક્રતવમપિ વૈરિઞ્ચમપિ વા ।
પ્રધાવન્તિ ત્યક્ત્વા દહનમિવ તત્ પ્રત્યુત મનો-
ભવારાતેરાખ્યે ત્વદમૃતરસાસ્વાદરસિકાઃ ॥ ૨૦॥

દિવં ક્ષોણીં ક્ષોણીં દિવમપિ નિરિન્દ્રં જગદિદં
તથાઽન્યેન્દ્રં વીતદ્રુહિણમપિ વાન્યદ્રુહિણકમ્ ।
પ્રગલ્ભન્તે કર્તું પ્રસવવિશિખદ્રોગ્ધુરભિધે
પ્રપન્નાસ્ત્વાં શાન્ત્યાઽપિ તુ સહજયોદાસત ઇમે ॥ ૨૧॥

ઘનાઃ કેઽપીશાખ્યે ત્વદમૃતરસાસારવિસરૈઃ
 જગત્કલ્યુદ્દામજ્વલદનલશાન્ત્યા શિશિરતામ્ ।
નયન્તસ્તન્વન્તસ્સમુચિતફલસ્યાપ્યુપચિતિં
 ક્ષમાભૂષા ભાન્તિ ક્ષપિતહરિદુદ્વેલતિમિરાઃ ॥ ૨૨॥

શિવાખ્યે ત્વદ્વર્ણદ્વિતયપરમાદ્વૈતરસિકાઃ
 પ્રિયપ્રાપ્તૌ શર્માપ્રિયસમુપલમ્ભે શુચમપિ ।
ભયં વા કસ્માચ્ચિત્ ભયજનકતાં કસ્ય ચ તથા
 ન વિન્દન્તે બ્રહ્માદ્યસુલભપરાનન્દભરિતાઃ ॥ ૨૩॥

જનો ધત્તે યો માં જગતિ રસનાયાં શ્રવસિ વા
 દિગીશા ધાતા વા દિશમપિ તદીયાં પરુષયા ।
દૃશા જાતુ દ્રષ્ટું કિમલમિતિ કામધ્રુગભિધે
 ત્વદીયપ્રસ્થાનધ્વનિભરમિષાદ્ ગર્જસિ મુહુઃ ॥ ૨૪॥

નિબન્ધારસ્તેઽમી મમ નિયતમાત્મીયરસના-
 ભુવીતિ ત્વં ત્રાસાદિવ કુસુમચાપધ્રુગભિધે ।
તૃણં મેરું મેરું તૃણમિતિ વિલાસવ્યવહૃતી-
 રપિ દ્રાગેતેષામયિ સફલયન્તી વિહરસે ॥ ૨૫॥

પરિત્યજ્યાશેષં જનનિ ભવતીમેવ ભજતાં
 ત્વમેવેશાનાખ્યે યદભિલષિતં દૈવતવરમ્ ।
દૃશં તત્તન્મૂર્ત્યા શ્રુતિમપિ તદુક્ત્યા સફલતાં
 નયન્તી ધત્સે નન્વવધિવિધુરાં નિર્વૃતિધુરામ્ ॥ ૨૬॥

શ્રુતા યે સ્વર્ધેનુત્રિદશતરુમુખ્યાસ્ત્વદનુગા-
 નુગાનાં ભ્રૂવલ્લીવલનવશગાસ્તે જગતિ તાન્ ।
તવૌદાર્યે માતર્ધરણિધરજાનેતુરભિધે
 કથઙ્કારં તુલ્યાન્ કથયતુ સલજ્જો યદિ જનઃ ॥ ૨૭॥

વિધાતું સન્ત્રાતું વિલયમપિ નેતું જગદલં-
 ભવન્તોઽપીશાખ્યે પ્રશમસમુપેતાસ્ત્વદનુગાઃ ।
ઉપેક્ષ્યા લોકસ્યાવમતસકલાસ્સન્તિ જગતિ
 ત્વયૈવૈકે તુષ્ટાસ્તવ ખલુ ત એતે રસવિદઃ ॥ ૨૮॥

શિવાખ્યે ત્વદ્વર્ણદ્વિતયમયિ ધત્તે શ્રિતવતાં
 મુખે ધર્મબ્રહ્મપ્રમિતિકરસર્વાક્ષરગણમ્ ।

પદે ધત્તે વેધઃપ્રભૃતિવિભવાન્નાત્ર તુ રતિઃ
　　વિનૈષાં ત્વદ્વર્ણદ્વિતયમિહ કોઽયં મધુરિમા ॥ ૨૯॥

મહેશાખ્યે જિહ્વાગ્ચલકલનમાત્રાત્તનુભૃતાં
　　સમસ્તાઘચ્છેત્રીં સકલસુખદાત્રીં ચ ભવતીમ્ ।
અવષ્ટભ્યૈવાહુર્ભગવતિ મહાકારુણિકતાં
　　શિવસ્ય ત્વાં હિત્વા કથય કતમો નિર્વહતુ તામ્ ॥ ૩૦॥

શિવાખ્યે સ્વાખ્યાસુ ત્રિપુરમથનઃ કૈટભરિપુઃ
　　તદીયાન્યા મૂર્તી રઘુપતિરપિ ત્વાં સમદધુઃ ।
અમીષ્વાદ્યસ્યૈવ પ્રભવતિ ભવત્યા વ્યવહૃતિઃ
　　તદીયસ્તાદૃક્ષસ્સુકૃતપરિપાકો વિજયતે ॥ ૩૧॥

અશેષબ્રહ્માણ્ડાવિરતચરિતાશેષદુરિતા-
　　ન્યલં તે સન્તૃપ્તિં ન હિ ઘટયિતું તાં ઘટયિતુમ્ ।
મદીયૈરેનોભિર્મદનમથનાખ્યે બત યતે
　　મમાગસ્સોઢવ્યં તદિદમયિ તુભ્યં નમ ઇદમ્ ॥ ૩૨॥

અયે જિહ્વાપીઠે જનનિ સમવસ્થાપ્ય ભવતીં
　　મમાઘૌઘં તુભ્યં મયિ સમુપહર્તું વ્યવસિતે ।
તવ સ્મૃત્યૈવાસૌ બત કબળિતઃ કિન્નુ કરવૈ
　　ક્ષમસ્વેમં મન્તું ભગવતિ પુરાં ભેત્તુરભિધે ॥ ૩૩॥

નિવેશો જિહ્વાયાં નિરવધિકપુણ્યોચ્ચયજુષાં
　　નિસર્ગપ્રાપ્તસ્તે નિટિલનયનાખ્યે ભવતુ તત્ ।
નિવેશં જિહ્વાયાં મમ યદિ ન ધત્સે જનનિ તે
　　નિતાન્તં પાપિષ્ઠોઽવિત ઇતિ ન સિદ્ધ્યેન્નનુ યશઃ ॥ ૩૪॥

શિવાખ્યે માતસ્ત્વં નનુ શશિવદિત્યાદિફણિતિ-
　　ચ્છલાદપ્યાવિશ્ય શ્રમભરમકસ્માત્તનુભૃતામ્ ।
હરસ્યેવં કર્તું હરિરથ હરો વા સ કિમલં
　　તદીયં માહાત્મ્યાન્તરમપલપામસ્તુ ન વયમ્ ॥ ૩૫॥

પિતૃભ્યાં ત્યક્તોઽસાવહમતિદુરાત્મેતિ ગિરિજા-
　　ગિરીશાભ્યાં ત્યક્તો નનુ જનનિ લોકેન ચ તથા ।
મમાસ્ત્યન્યા કાચિજ્જગતિ ન ગતિર્યામિ શરણં
　　શિવાખ્યે ત્વામેકામયિ જહિહિ વા માં બિભૃહિ વા ॥ ૩૬॥

પરિત્યાજ્યં સર્વેઽપ્યભિદધતિ પાપિષ્ઠમયિ તે
શિવાખ્યે સઙ્ગ્રાહ્યસ્સ જયતિ તવૈતત્ સમુચિતમ્ ।
પ્રપન્ના ત્વં કિન્નોદયિનિ ગરલે ચામૃતરસે
પયોધેસ્તત્રાદ્યગ્રહણરસિકં તં પ્રભુમણિમ્ ॥ ૩૭॥

મમાજસ્રં દોષાન્ સમુપઘટયન્તોઽન્તરરયો
જયન્તીશઃ પશ્યન્ હૃદિ વસતિ મદ્દૌસ્થ્યમખિલમ્ ।
અથૈવં સત્યાગોઽખિલમપલપન્ત્યમ્બ બિભૃષે
કથં મામીશાખ્યે કથય તવ કઃ સ્તૌતુ વિભવમ્ ॥ ૩૮॥

સ્ફુટાયાં દ્વારીશેતરમિતરયા સાધુ નયતે
યથા પ્રાપ્ય સ્થાનં સુહૃદિહ મનોજઘ્રુગભિધે ।
સ્વકર્માદાવીશેતરમિમમખેદં શિવપદં
તથા કલ્યાણિ ત્વં નનુ કલયસિ ત્વત્કલનયા ॥ ૩૯॥

સ્વકર્માદાવીશં જનમપિ ભવત્યેવ બિભૃતે
વિના ત્વાં તસ્યાપિ સ્વવિરચિતસાદ્ગુણ્યવિરહાત્ ।
બુભૂષોસ્સર્વસ્ય ત્વમસિ તદુપાસ્યા કિમપરં
ત્વયાઽઽસ્તે લબ્ધાત્મા ભગવતિ શિવાખ્યે સ ચ શિવઃ ॥ ૪૦॥

ન કર્માધ્વન્યોઽહં ભગવતિ ન વા ભક્તિપથિકો-
ઽસ્મ્યુપાદેયઃ કોઽપિ સ્ફુરતિ ગુણલેશોઽપિ ન મયિ ।
અસઙ્ખ્યાતા દોષાઃ કિમત ઇહ દૌરાત્મ્યમિતરત્
તદમ્બ ત્વત્તોઽન્યા ન જગતિ શિવાખ્યે મમ ગતિઃ ॥ ૪૧॥

સુતસ્યાખ્યાં નારાયણગિરમુપાદત્ત યદજા-
મિળસ્તં તદ્ભીતાસ્તપનસુતદૂતાઃ પ્રવિજહુઃ ।
ત્વમીશાખ્યે ભીતિં નયસિ વિમતાંસ્તે મુદમથા-
નુગાન્કારુણ્યાર્દ્રાસ્ત્વહહ નિખિલે તે ત્વદનુગાઃ ॥ ૪૨॥

સુરભિશરભિદાખ્યે સુન્દરે ત્વજ્ઝરેઽસ્મિન્
નિરુપહતિ વિહર્તું નિત્યમુદ્ગ્રીવિતાશમ્ ।
અપનયસિ કિમેવં હન્ત મામન્તરાયૈઃ
મનસિ ન કુરુ માતર્મામકાન્ દેવિ મન્તૂન્ ॥ ૪૩॥

કિમકુરુત મુદે મે કર્મ વર્ણાશ્રમાર્હં

કિમભજત મદઙ્ઘ્રી કિં વ્યધાદેષ કો વા ।
ઇતિ નિજસમિતૌ મામીક્ષમાણે ગિરીશે
મદનુગ ઇતિ માતર્ગર્જ ધીરં શિવાખ્યે ॥ ૪૪॥

જગતિ વશિગિરા ત્વદ્વ્યત્યયેનોલ્લસન્ત્યા
જનનિ પરિગૃહીતાંસ્ત્વં સ્વકર્માદિનિષ્ઠાન્ ।
ન કિમવસિ શિવાખ્યે હા તયાઽનાદૃતં માં
અવિતુમિહ વિળમ્બઃ કસ્ત્વદેકાવલમ્બમ્ ॥ ૪૫॥

અમ્બ ત્વદીયમહિમામ્બુધિશીકરાણુ-
વેદી સુધીસ્ત્વયિ નિરન્તરવૃત્ત્યલાભે ।
ઈશાભિધે ભુવિ સમેતુ ન કિં પિપાસોઃ
અભ્યર્ણગેઽમ્ભસિ નિરુદ્ધગતેરવસ્થામ્ ॥ ૪૬॥

ઇતો રોગાઃ કામાદય ઇત ઇતઃ સ્ત્રીસુતમુખાઃ
કૃતાન્તાસ્સર્વત્રેત્યયમનવધિઃ ક્લેશજલધિઃ ।
તમેતં ચાક્રાય ત્વદનુગદયોલ્લાસઘટભૂઃ
નિપીયેશાખ્યે મામભિરમયતુ ત્વત્પરિસરે ॥ ૪૭॥

અમ્બ પ્રસીદ કુરુ મામનઘં બલાત્ત્વં
અઙ્કે ચ તે કુરુ નિષણ્ણમમું શિવાખ્યે ।
જમ્બાલસક્તમમલં કુરુતે ન માતા
કિં બાલકં ન કુરુતેઽઙ્કજુષઞ્ચ હૃષ્ટા ॥ ૪૮॥

આવિર્ભવસ્યયિ નૃણાં ત્વમયત્નતોઽગ્રે
ગ્લાનિં ધુનોષિ ઘટયસ્યપિ મઙ્ગલાનિ ।
ઈશાભિધે તવ યશો ન કિમુજ્જિહીતાં
ઈર્ષ્યાકુલત્વમમરા ન કિમશ્રુવીરન્ ॥ ૪૯॥

મદનહન્ત્રભિધે તવ નિર્ઝરાઃ
મધુસુધાલહરીરતિશેરતે ।
કૃતધિયો વિહરન્તિ ચ તેષ્વમી-
ષ્વરસિકોઽત્ર હતોઽસ્મ્યહમેકકઃ ॥ ૫૦॥

શિવાખ્યે મા ભૈષીઃ પદમમરનેતુર્નનુ ભવેત્
અમુષ્મૈ દાતવ્યં સરસિજભુવો વા પદમિતિ ।
સમીહે નાહં તત્ કિમપિ સહસાઽભ્યેહિ રસનાં

મમેમાં મા હાસીસ્સમભિલષિતં મે પુનરિદમ્ ॥ ૫૧॥

પ્રદાય ત્રૈલોક્યશ્રિયમથ વિમુક્તિશ્રિયમપિ
ત્વમન્તર્લજ્જાર્તા ભવસિ કિમમુષ્મૈ કૃતમિતિ ।
વ્યથૈષા દિષ્ટ્યા ત્વદ્રસિકતિલકૈસ્તે પરિહૃતા
વિના ત્વામીશાખ્યે ન કિમપિ યદેષાં રતિપદમ્ ॥ ૫૨॥

જન્માસ્ય વાર્યમિતિ તે જનનિ પ્રસાદો
જાયેત ચેન્મયિ તદસ્તુ શિવાભિધે નઃ ।
ત્વન્નિષ્ઠતાભરનિરન્તરતાતિરમ્યં
યજ્જન્મ તન્મમ ન જીર્યતુ તે નમોઽસ્તુ ॥ ૫૩॥

વિશ્વાધિનેતુરખિલાર્થવિદઃ સ્મરારેઃ
અજ્ઞાતતાં મદઘરાશિમમું નયન્તી ।
માં ત્રાયસે મદનહન્ત્રભિધેઽમ્બ કસ્તે
ચાતુર્યસાહસભરૌ ચતુરોઽભિધાતુમ્ ॥ ૫૪॥

પ્રસીદ ગિરિશાભિધે પ્રદિશ મન્મતાવમ્બયા
સહ સ્ફુરણમૂર્જિતં સતતમિન્દુમૌળેર્વિભોઃ ।
તથાઽનિશમિહાસિકાં તવ મદીયજિહ્વાઞ્ચલે
દદસ્વ મમ કાઙ્ક્ષિતં દ્વયમિદં ત્વદેકાસ્પદમ્ ॥ ૫૫॥

ન સંસ્ફુરતુ કાઙ્ક્ષતઃ સ્ફુરણમીશ્વરાખ્યે કથં
હૃદિ ત્વદનુગસ્ય તદ્ભૃકુટિકિઙ્કરશ્શઙ્કરઃ ।
ચરન્તુ વિષયા હરસ્ફુરણરોધિનો હૃદ્યમી
કથં કથય ગર્જનૈર્જનનિ તર્જયન્ત્યાં ત્વયિ ॥ ૫૬॥

મમાયમવબુદ્ધ્યતાં મધુરિમાણમૂર્જસ્વલં
કદાપિ વિજહાતુ માં ન રસનૈતદીયેતિ મે ।
દયસ્વ ગિરિશાભિધે નનુ દદીત સા મેઽથવા
તદેતદભિકાઙ્ક્ષિતં ત્વદનુગેષુ જાત્વાનતિઃ ॥ ૫૭॥

મનાગપિ મનઃ સ્પૃશેન્મમ યદેદમર્થાન્તરં
તદા દ્રુતમપૈષ્યહો ત્વમપહાય જિહ્વાં મમ ।
તથામ્બ ગિરિશાભિધે તવ ન વિપ્રલમ્ભઃ ક્ષમો
ભણેત્ ક ઇહ કિં પ્રસૂર્ભવતિ વિપ્રલબ્ધ્રી યદિ ॥ ૫૮॥

યદા ત્વમપયાસિ માં જનનિ વઞ્ચયિત્વા સ્વયં
તદા નિયતમાહરોપહરમુખ્યસઞ્જલ્પનૈઃ ।
યથા કલિતવઞ્ચનઃ પુરહરાભિધે ત્વામહં
નયાનિ રસનાં તથાઽઞ્ચતુ વિધેઃ પ્રસાદો મયિ ॥ ૫૯॥

શરણિતવન્તઃ ખલુ યે શશિકન્દળશેખરાભિધે ભવતીમ્ ।
તચ્ચરણામ્બુજવિહરણસંસ્મરણં સુરઘટાકિરીટતટે ॥ ૬૦॥

શરણં જગતો હ્યેતે શરણિતવન્તશ્શિવાભિધેયે ત્વામ્ ।
અભિલષિતં યદમીષામસુલભમિતિ તન્ન કિં વિયન્નળિનમ્ ॥ ૬૧॥

મહેશે તત્સઙ્ગિષ્વપિ કૃતિષુ પાષાણહૃદયે
વરાકે મય્યસ્મિન્ પ્રવિદધતિ સન્તઃ પ્રણયિતામ્ ।
કથઙ્કારં માતર્દળય તદિહેમાં મમ હૃદો
દૃષત્તામત્રામ્બ સ્મરભિદભિધે ત્વં ખલુ ગતિઃ ॥ ૬૨॥

ઇતિ શ્રીશ્રીધરવેઙ્કટશાર્યવિરચિતા આખ્યાષષ્ટિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

---

*Akhyashashtih*

pdf was typeset on November 21, 2021

Please send corrections to *sanskrit@cheerful.com*